## विभाषा कदाकर्ह्योः । (५/२७८४)

[1]कदा कर्हि इत्येतयोः उपपदयो[2]र्विभाषा भविष्यति काले[3] धातोः लट् प्रत्ययो भवति । कदा भुङ्क्ते, कदा भोक्ष्यते, [4]कदा भोक्ता । कर्हि भुङ्क्ते, कर्हि भोक्ष्यते, कर्हि भोक्ता ॥

## किंवृत्ते लिप्सायाम् । (६/२७८५)

[5]विभाषा इति वर्तते । किमो वृत्तं किंवृत्तम् । वृत्तग्रहणेन तद्विभक्त्यन्तं प्रतीयात् । डतरतमौ च इति परिसङ्ख्यानं स्मर्यते । किंवृत्ते उपपदे लिप्सायां[6] भविष्यति काले धातोः विभाषा लट् प्रत्ययो भवति । लिप्सा लब्धुमिच्छा, प्रार्थनाभिलाषः । कं भवन्तो भोजयन्ति, कं भवन्तो [7]भोजयितारः । लब्धुकामः पृच्छति [8]कतरो भिक्षां दास्यति, ददाति, दाता वा । [9]कतमो भिक्षां दास्यति, ददाति, दाता वा । लिप्सायाम् इति किम् ? कः पाटलिपुत्रं गमिष्यति ॥

## लिप्स्यमानसिद्धौ च । (७/२७८६)

[10]विभाषा इत्येव । लिप्स्यमानात् सिद्धिः लिप्स्यमानसिद्धिः । [11]लिप्स्यमानसिद्धौ गम्यमानायां भविष्यति काले [12]धातोः विभाषा लट् प्रत्ययो भवति । अकिंवृत्तार्थोऽयमारम्भः । यो भक्तं ददाति स स्वर्गं गच्छति, यो भक्तं दास्यति स स्वर्गं गमिष्यति, यो भक्तं दाता स स्वर्गं गन्ता (म. भा. २.१४०) । लिप्स्यमानाद् भक्तात् स्वर्गसिद्धिमाचक्षाणो दातारं प्रोत्साहयति ॥

## लोडर्थलक्षणे च । (८/२७८७)

[13]लोडर्थः प्रैषादिर्लक्ष्यते येन स लोडर्थलक्षणो धात्वर्थः । [14]तत्र वर्तमानाद् धातोः भविष्यति काले विभाषा लट् प्रत्ययो भवति । उपाध्यायश्चेद् आगच्छति, उपाध्यायश्चेदागमिष्यति, उपाध्यायश्चेदागन्ता, अथ त्वं छन्दोऽधीष्व, अथ त्वं व्याकरणमधीष्व । उपाध्यायागमनमध्ययनप्रैषस्य [15] लक्षणम् ॥

## लिङ् चोर्ध्वमौहूर्तिके । (९/२७८८)

[16]भविष्यति, विभाषा, लोडर्थलक्षणे इति [17]सर्वमनुवर्तते । ऊर्ध्वमौहूर्तिके भविष्यति काले [18]लोडर्थलक्षणार्थे वर्तमानात् धातोर्विभाषा लिङ्प्रत्ययो भवति, चकाराल् लट् [19]च । ऊर्ध्वं मुहूर्ताद् भवः ऊर्ध्वमौहूर्तिकः । निपातनात समासः, उत्तरपदवृद्धिश्च । भविष्यतश्चैतद्विशेषणम् । ऊर्ध्वं मुहूर्तात् उपरि [20]मुहूर्तस्य उपाध्यायश्चेदागच्छेत्, उपाध्यायश्चेदागच्छति, उपाध्यायश्चेदागमिष्यति, उपाध्यायश्चेदागन्ता, अथ त्वं छन्दोऽधीष्व, अथ त्वं व्याकरणमधीष्व[21] ॥

---

1. भविष्यतीत्येव इत्यधिकम् ब. 2. विभाषया ग. 3. विषये इत्यधिकम् क, धातोः नास्ति ग. ह. 4. कदा नास्ति फ. 5. भविष्यति इत्येव इत्यधिकम् ब. 6. गम्यमानायाम् इत्यधिकम् ब. फ. ह. 7. भोज–यिष्यन्ति अ. क. 8. कतरो भवतोः ड. 9. कतमो भवतां ब. 10. भविष्यति इत्येव इत्यधिकम् ब. 11. लिप्सायां ब, तस्यां अ. ब. क. ग. फ. ह. 12. धातोः नास्ति अ. क. 13. भविष्यति इत्येव । विभाषा इति च इत्यधिकम् ब. 14. तस्मिन् ब. ड. फ. ह. 15. च इत्यधिकम् ह. 16. वाक्यमिदं नास्ति ह. 17. सर्वं नास्ति ब. 18. लोडर्थलक्षणे धात्वर्थे अ. ब. क, वर्तमाने धात्वर्थे फ. 19. विभाषा अ. ब. क. 20. मुहूर्ताद्वा फ. 21. निरुक्तमधीष्व इत्यधिकम् फ.